# Balaye Prahladaproktam Vamana Pradurbhava Varnanam

# બલયે પ્રહ્લાદપ્રોક્તં વામનપ્રાદુર્ભાવવર્ણનમ્

## Document Information

Text title : Balaye Prahladaproktam Vamana Pradurbhava Varnanam

File name : balayeprahlAdaproktaMvAmanaprAdurbhAvavarNanam.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 76

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# બલયે પ્રહ્લાદપ્રોક્તં વામનપ્રાદુર્ભાવવર્ણનમ્

પ્રહ્લાદઃ પ્રાહ દૈત્યેન્દ્રં બલિં વૈરોચનિં તદા
વત્સ જ્ઞાતં મયા સર્વં યદર્થં ભવતામિયમ્ ।
તેજસો હાનિરુત્પન્ના તચ્છ્રૃણુ ત્વમશેષતઃ ॥ ૧૭॥

દેવદેવો જગદ્યોનિરયોનિર્જગદાદિકૃત્ ।
અનાદિરાદિર્વિશ્વસ્ય વરેણ્યો વરદો હરિઃ ॥ ૧૮॥

પરાપરાણાં પરમઃ પરઃ પરવતામપિ ।
પ્રભુઃ પ્રમાણં માનાનાં સપ્તલોકગુરોર્ગુરુઃ ॥ ૧૯॥

સ્થિતિં કર્તું જગન્નાથઃ સોઽદિત્યા ગર્ભતાં ગતઃ
પ્રભુઃ પ્રભૂણાં પરમઃ પરાણામનાદિમધ્યો ભગવાનનન્તઃ ।
ત્રૈલોક્યમંશેન સનાથમેષ કર્તું મહાત્માદિતિજોઽવતીર્ણઃ ॥ ૨૦॥

ન યસ્ય રુદ્રો ન ચ પદ્મયોનિર્નેન્દ્રો ન સૂર્યેન્દુમરીચિમિશ્રાઃ ।
જાનન્તિ દૈત્યાધિપ યત્સ્વરૂપં સ વાસુદેવઃ કલયાવતીર્ણઃ ॥ ૨૧॥

યોઽસૌ કલાંશેન નૃસિંહરૂપી જઘાન પૂર્વં પિતરમશેષઃ ।
યઃ સર્વયોગીશમનોનિવાસઃ સ વાસુદેવઃ કલયાવતીર્ણઃ ॥ ૨૨॥

યમક્ષરં વેદવિદો વિદિત્વા વિશન્તિ તં જ્ઞાનવિધૂતપાપાઃ ।
યસ્મિન્પ્રવિષ્ટા ન પુનર્ભવન્તિ તં વાસુદેવં પ્રણમામિ દેવમ્ ॥ ૨૩॥

ભૂતાન્યશેષાણિ યતો ભવન્તિ યથોર્મયસ્તોયનિધેરજસ્રમ્ ।
લયં ચ યસ્મિન્પ્રલયે પ્રયાન્તિ તં વાસુદેવં પ્રણમામ્યચિન્ત્યમ્ ॥ ૨૪॥

ન યસ્ય રૂપં ન બલં પ્રભાવો ન ચ સ્વભાવઃ પરમસ્ય પુંસઃ ।
વિજ્ઞાયતે સર્વપિતામહાદ્યૈસ્તં વાસુદેવં પ્રણમામ્યચિન્ત્યમ્ ॥ ૨૫॥

રૂપસ્ય ચક્ષુર્ગ્રહણે ત્વગેષા સ્પર્શગ્રહીત્રી રસના રસસ્ય ।
શ્રોત્રં ચ શબ્દગ્રહણે નરાણાં ઘ્રાણં ચ ગન્ધગ્રહણે નિયુક્તમ્ ॥ ૨૬॥

ન ઘ્રાણચક્ષુઃશ્રવણાદિભિર્યઃ સર્વેશ્વરો વેદિતુમવ્યયાત્મા ।
શક્યસ્તમીડ્યં મનસૈવ દેવં ગ્રાહ્યં નતોઽહં હરિમીશિતારમ્ ॥ ૨૭॥

યેનૈકદંષ્ટ્રાગ્રસમુદ્ધૃતેયં ધરાચલા ધારયતીહ સર્વમ્ ।
ગ્રસ્ત્વા સ શેતે સકલં જગદ્યસ્તમીડ્યમીશં પ્રણતોઽસ્મિ વિષ્ણુમ્ ॥ ૨૮॥

શાં!વતીર્ણેન ચ યેન ગર્ભે હૃતાનિ તેજાંસિ મહાસુરાણામ્ ।
નમામિ તં દેવમનન્તમીશમશેષસંસારતરોઃ કુઠારમ્ ॥ ૨૯॥

દેવો જગદ્યોનિરયં મહાત્મા સ ષોડશાંશેન મહાસુરેન્દ્ર ।
સુરેન્દ્રમાતુર્જઠરં પ્રવિષ્ટો હૃતાનિ વસ્તેન બલે વપૂંષિ ॥ ૩૦॥

ઇતિ વિષ્ણુધર્મેષુ ષટ્સપ્તતિતમોઽધ્યાયાન્તર્ગતં બલયે પ્રહ્લાદપ્રોક્તં
વામનપ્રાદુર્ભાવવર્ણનં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Balaye Prahladaproktam Vamana Pradurbhava Varnanam*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*